This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

Checked 2012

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 139 विषय मंत्र

नाव. गायत्री शापविमोचनम्, गायत्रीपंचांगम्

लेखक/लिपीकार —

पृष्ठ संपूर्ण 8 काळ — पूर्ण/अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

(5a)

॥ अथ गायत्री शापविमोचनं ॥ श्रीदत्त ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री गणेशाय नमः ॥ अथ गायत्री शापविमोचनं ॥ अस्य
श्री गायत्री शापविमोचन मंत्रस्य ॥ वसिष्ठ ऋषिः ॥ अनुष्टुप् छं
२ दः ॥ शांतिरूपिणी गायत्री परमात्मा देवता ॥ ॐ बीजं ॥ ह्रीं
शक्तिः ॥ ब्रम्हयोनीति कीलकं ॥ मम गायत्र्या अभिमुख्यार्थे
जपे विनियोगः ॥ ॐ अहो महा बहूरूपे अंगुष्ठाभ्यां नमः
॥ ॐ दिव्यसंध्ये सरस्वती तर्जनी० ॥ अजरे अमरे देवी मध्य०
॥ ॐ ब्रम्हयोनी नमोस्तुते अनामिका० ॥ ॐ अहो महा बहु
रूपे दिव्यसंध्ये सरस्वती कनिष्ठिका० ॥ ॐ अजरे अमरे दे
वी ब्रम्हयोनी नमोस्तुते करतलकरपृष्ठाभ्यां नमः ॥ एवं हृदया
दि ॥ ततो गायत्रीं ध्यात्वा ॥ अमुं मनुं जपेत् ॥ ॐ अहो महा
बहुरूपे दिव्यसंध्ये सरस्वती अजरे अमरे देवी ब्रम्हयोनी न २
मोस्तुते ॥ इति साधारण शापविमोचनं ॥ ॐ ब्रम्हशापविमो
चन मंत्रस्य ॥ निग्रहानुग्रह कर्ता प्रजापति ऋषिः ॥ कामदुग्धा
गायत्री छंदः ॥ ब्रम्हशापविमोचनि गायत्री शक्तिर्देवता ॥ ब्र
म्हशापविमोचनार्थे जपे विनियोगः ॥ ॐ सावित्रीं ब्रम्हेत्यु
पासीत ॥ यद्रूपं ब्रम्हविदुस्तां पश्यंति धीराः सुमनसा वाच
मग्रता ॥ इति ब्रम्हशापविमोचनादि मुक्ता भव ॥ अथ विश्वा
मित्र शापविमोचनं ॥ विश्वामित्र शापविमोचनमंत्रस्य ॥ नूत
न सृष्टि कर्ता विश्वामित्र ऋषिः ॥ वाग्देह गायत्री शक्तिर्देवता
विश्वामित्र शापविमोचने विनियोगः ॥ ॐ गायत्रीं भजाम्य
ग्निमुखीं विश्वगर्भां यदुद्भवाश्चाक्रिरे विश्वसृष्टितां कल्याणी
मिष्टिकरि प्रपद्ये ॥ यन्मुखे निसृतो खिलदेवगर्भाः ॥ इति
विश्वामित्र शापादि विमुक्ता भव ॥ अथ वासिष्ठ शापविमो
चनं ॥ वसिष्ठ शापविमोचनमंत्रस्य ॥ शापानुग्रह कर्ता वसि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्ठ ऋषिः॥ उष्णिक् गायत्री छंदः॥ वसिष्ठानुग्रहीता गायत्री
२ शक्तिर्देवता॥ वसिष्ठशापविमोचनार्थे जपे विनियोगः॥
ॐ तत्वानि चांगधग्नि चित्तो धियां सः॥ ध्यायंति विष्णो श
युधानि बिभ्रत्॥ तेजानां नुत्ता सा परमां व भश्चत्॥ गा
यत्री मासेदुरनुत्तमं च धाम॥ सोऽहमर्कमी हं ज्योति रर्क
ज्योति रहं शिवः॥ आत्मज्योति रहं शुक्रः॥ सर्वज्योतिरसोऽह
माम्॥ इति वसिष्ठशापाद्विमुक्ता भव॥ अथ मुद्रा प्रदर्श
येत्॥ सुमुखं संपुटं चैव विततं विस्तृतं तथा॥ द्विमुखं त्रिमु
खं चैव चतुःपंचमुखं तथा॥ षण्मुखाधोमुखं चैव व्यापिकांज
लिकं तथा॥ शकटं यमपाशं च ग्रथितं चोन्मुखोन्मुखं॥ प्रलंब
मुष्टिकं चैव मत्स्यकूर्मवराहकं॥ सिंहाक्रांतं महाक्रांतं मुद्गरं प २
ल्लवं तथा॥ एता मुद्राश्चतुर्विंश गायत्री सुप्रतिष्ठिता॥ आगच्छ व

कव्यापिनी॥ आयातु वरदा देवी जपे संनिहितो भव॥ तद्बीजं
॥ भुवः शक्तिः॥ सुवः कीलकं॥ इति त्रिकाले योज्यं॥ स्वाराति स्व
रमानाकारः अग्नितत्वं॥ रक्तवर्णा॥ आदित्यपथागामिनी रक्त
वर्णा कर्मज्ञाने विनियोग इत्येषा गायत्री॥ माध्यान्ह संध्या श्वेतप
द्मासनस्था श्वेतांबरधरा॥ श्वेतवर्णा श्वेतमाल्या॥ श्वेतगंधानु
लेपना॥ पंचमुखी॥ दशभुजा त्रिनेत्रा॥ अक्षमालाकमंडलु
डमरु मृगत्रिशूल कपालवरदाभयारविंद द्वयधारिणी॥ सर्वा
भरणभूषितेत्येषा सावित्री॥ षट्कुक्षिः॥ पंचशीर्षाग्निमुखा रु
द्रशिखा॥ विष्णुर्हृदयः॥ ब्रम्हकवचं॥ सांख्यायनसगोत्रा॥ भू
र्लोकव्यवस्थितादित्यपथगामिनी॥ श्वेतवर्णा॥ ब्रम्हज्ञाने विनि
योग इत्येषा सावित्री॥ सायं संध्या॥ कृष्णपद्मासनस्था कृष्णां
बरधरा कृष्णमाल्या कृष्णगंधानुलेपना॥ शुक्लमुखी॥ चतुर्भुजा॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्विनेत्रा ॥ शंखचक्रगदापद्मधारिणी ॥ सर्वाभरणभूषेत्येवास
५ रस्वती ॥ वृद्धा गरुडवाहिनी ॥ सामवेदसंहिता विष्णुदैवत्या
॥ त्रिपदा षट्कुक्षिः पंचशीर्षा अग्निमुखं ॥ रुद्रः शिखा विष्णु
हृदयं ॥ ब्रह्मकवचं सांख्यायनगोत्रा ॥ सुवर्लोकव्यवास्थितादि
त्यपथगामिनी ॥ कृष्णवर्णा मोक्षज्ञाने विनियोग इत्येषा सरस्व
ती ॥ प्रणवेन नियुक्ता व्याहृति सप्तसु ॥ सर्वेषामेव पापानां सका
राममुपास्थिते ॥ दशशत सहस्रमभ्यर्च्य गायत्रीं पावनं महत् ॥ अन्हा
दो त्रिर्वसिष्ठश्च शक्तः कण्वः पराशरः ॥ विश्वामित्रो महातेजा कु
पिलः शौनको महान् ॥ याज्ञवल्क्यो भरद्वाजो जमदग्निस्तपोनि
धिः ॥ गौतमो मुद्गलश्रेष्ठो वेदव्यासश्च लोमशः ॥ अगस्त्यः कौशिकः
कुत्सः पुलस्त्यो वृकणस्तथा ॥ उत्का त्यत्वा तथा मध्या प्रतिष्ठा न्यास
पूर्वकं ॥ गायत्र्युष्णिगनुष्टुप्च बृहती पंक्तिरेव च ॥ त्रिष्टुप्च जगती चैव ५

तथातिजगती तिच ॥ शक्वरी स्यातिपूर्वस्यां ह्यष्ट्यत्यष्टिस्तथा
स्मृतः ॥ धृतिश्चातिधृतिश्चेति कृतिप्रकृतिराकृतिः ॥ विकृतिः
संकृतिश्चैव तथैवाकीनराकृतिः ॥ इत्येते छंदसां संज्ञां क्रमशो वाच्मे
सांप्रति ॥ भूरिति छंदो भुवरिति छंदो सुवरिति छंदो भूर्भुवः सुवरि
ति छंदो देवि गायत्री त्यन्नानि छंदांसि ॥ प्रथममाग्नेयं ॥ द्वितीयं प्रा
जापत्यं ॥ तृतीयं सौम्यं ॥ चतुर्थमीशानं ॥ पंचममादित्यं ॥ षष्ठं बार्ह
स्पत्यं ॥ सप्तमं पितृदैवत्यं ॥ अष्टमं भगदैवत्यं ॥ नवममर्यम्णं ॥ दशमं
सावित्रं ॥ एकादशं त्वाष्ट्रं ॥ द्वादशं पौष्णं ॥ त्रयोदशं मैत्राग्निं ॥ चतुर्द
शं वामव्यं ॥ पंचदशं वामदेव्यं ॥ षोडशं मैत्रावरुणं ॥ सप्तदशं भ्रा
तृव्यं ॥ अष्टादशं वैश्वदेवं ॥ एकोनविंशति वैष्णवं ॥ विंशति वा
सवं ॥ एकविंशति त्रैष्टुभं ॥ द्वाविंशति कौबेरं ॥ त्रयोविंशति माश्वि
नं ॥ चतुर्विंशति ब्राह्मं ॥ दीर्घस्वरेण संयुक्तं बिंदुदश समन्वितं ॥ व्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पकानि न्यसेत्पश्चाद्रापंचाक्षराणि च ॥ठं बं धं नादसुन्त्रस्य
६ रबिजानि ॥ प्रह्लादिना प्रभासत्या निश्चा भद्राविलासिनी ॥प्र
भावति जया शांति कांता दुर्गा सरस्वती ॥ विद्रुमा च विशालेया
व्यापिनि च विलास तथा ॥ तमोपहारिणी सुसूक्ष्मा विश्वयोनिश्च पापहा
॥पद्मालया परा शोभा भद्रा भूर्पश्च शान्तःमः ॥ पृथिव्यापस्तथा तेजो
वायुराकाश एव च ॥ गंधो रसश्च रूपं च शब्दस्पर्शस्तथैव च ॥ घ्राणं
जिह्वा च चक्षुश्च त्वक् च श्रोत्रमतः परं ॥उपस्थ पायु पादाश्च
पाणि वागपि च क्रमं ॥ मनो बुद्धि रहंकार चित्तं चेति यथाक्रमं ॥सु
मुखं संपुटं चैव० ॥ द्यौर्मूर्ध्नि संपाद्यते ॥ ब्रह्मा विष्णु ललाटे ॥ रुद्रो
भ्रुवोर्मध्ये ॥ चक्षुषो श्चंद्रादित्यौ ॥ कर्णयोः शुक्र बृहस्पती ॥ नासि
के वायुदैवत्यौ ॥ दंतोष्ठा उभय संधाते ॥ मुखे अग्निः ॥ जिव्हा सरस्वती ॥ ६

ग्रीवासु स्याल्पाया नुभ्रुहिति ॥ स्तनयोर्वसवः ॥ बाह्वो र्मरुतः ॥ हृ
दयं पर्जन्याः ॥ आकाशं उदरं ॥ नाभि रंतरिक्षं ॥ कटिश्चेंद्रः ॥ जंघा
नं प्रजापत्यं ॥ कैलास मलया ऊरुः ॥ विश्वेदेवा जानुभ्यां ॥जान्वोः
कुशिकः ॥ जंघयोरनुहृयं ॥ सुराः पितरः ॥ पादौ पृथिवी ॥ वनस्प
तयो गुल्फौ ॥ रोमाणि नखानि भवंति ॥ मुहूर्तास्ते विग्रहः ॥केतुर्मा
साः ऋतवः ॥ संध्या काल त्रय मास्यानं ॥ संवत्सरं निमिषः ॥ अहोरा
त्रमादित्यचंद्रमाः ॥सहस्त्र मात्मा देवीं शतमध्यां दशावरां ॥सहस्र
सहितां नेत्रां गायत्रीं शरणं महत् ॥ तत्सवितुर्वरदाय नमः ॥ भूः
पर्जन्यायनमः ॥ तत्प्रातरादित्यो प्रातिष्ठाय नमः ॥ प्रातर्धीयानो
इति त्रिः गायत्री हृदयं ब्राह्मणं प्रयतः पठेत् ॥चत्वारो वेदाश्चाधी
ता भवंति ॥ ^अचोष्या चोष्य पूतो भवति ॥ अलेह्या लेह्या पू० ॥सु
रापानात्पू० ॥ सुवर्णस्तेयात्पू० ॥ वृषलि गमनात्पू० ॥ अब्रह्मचारी भ
^अगम्यागमनात्पूतो भवति ॥भूतो भवति ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह्मचारी भवति ॥ पतितसंभाषणात्पू० ॥ वीरहत्यात्पू० ॥ ब्रह्मह
७ त्यात्पू० ॥ सर्वभ्रांति ग्रहात्पू० ॥ सर्वान्कामान्लभंते ॥ अनेनहृद
येनाधीयते ॥ न क्रतुदानेन महिद्धि भवति ॥ य इदं गायत्रीहृ
दयं ब्राह्मणः प्रयतः शुचिः ॥ सर्वपापैः प्रमुच्यते ॥ न ब्रह्मलोको
महीयते ॥ ब्रह्मलोको महीयत इत्याह याज्ञवल्क्यः ॥ जातवेद
से ऋचं पठित्वा पूतो भवति ॥ इति विश्वामित्र संहितायां गा
यत्रीहृदयं संपूर्णमस्तु ॥ श्रीदत्तात्रेयार्पणमस्तु ॥ ५८ ॥

॥ श्रीगणेशायनमः ॥ अथ गायत्री पंचांगं लिख्यते ॥ तद्य
था ॥ ॐ अस्य श्री गायत्री कवचस्तोत्र मंत्रस्य ॥ ब्रह्मा वि
ष्णु महेश्वर ऋषयः ॥ ऋग्यजुःसामाथर्वण छंदांसि ॥ ब्रह्म
स्वरूपिणी गायत्री सावित्री सरस्वती देवता ॥ ॐ तदिति बी
जं ॥ भर्ग इति शक्तिः ॥ धियइति कीलकं ॥ मम गायत्री सावि
त्री सरस्वती प्रसादसिद्ध्यर्थं जपे विनियोगः ॥ अनेन मंत्रेण
गायत्र्या अंगन्यासं कुर्यात् ॥ गायत्रीन्यासं कुर्यात् ॥ ॐ तत्स
वितुर्ब्रह्मात्मने अंगुष्ठाभ्यां नमः ॥ ॐ वरेण्यं विष्ण्वात्मने तर्जनी
भ्यां नमः ॥ ॐ भर्गो देवस्य रुद्रात्मने मध्यमा० ॥ ॐ धीमहि
ईशानात्मने अनामिकाभ्यां० ॥ ॐ धियो योनः सूर्यात्मने कनिष्ठिका०
॥ ॐ प्रचोदयात् सत्यात्मने करतलकरपृष्ठाभ्यां० ॥ एवं हृदयादि
॥ अथ ध्यानं ॥ मुक्ता विद्रुम हेम नील धवलच्छायैर्मुखैस्त्रीक्षणै
र्युक्तामिंदुकला निबद्धमुकुटां तत्वार्थवर्णात्मिकां ॥ गायत्रीं वरदाभ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यां कुशाकशां शुभ्रं कपालं गुणं शंखं च क्रमथार विंदं पुंगुलंह
६ स्तै वहंतीं भजेत् ॥इति ध्यानं ॥ मानसोपचारैः संपूज्य ॥कव
चं पठेत् ॥ गायत्री पूर्वतः पातु सावित्री पातु दक्षिणे ॥ मध्य
संध्यातु मे पश्चादुत्तरा मे सरस्वती ॥ १॥ पावकीं दिशा मारक्षेत्
पावकज्वाल शालिनी ॥ यातुधानिं दिशं रक्षेद्यातुधान भयंक
री ॥ २ ॥ पावमानी दिशं रक्षेत्पावमान विलासिनी ॥ दिशं रौ
द्रीं च मे पातु रौद्री रुद्र स्वरूपिणी ॥ ३॥ ब्रह्माणी पातु मे चोर्ध्वे अ
धस्ताद्वैष्णवी तथा ॥ एवं दश दिशा रक्षेत्सर्वांगं भुवनेश्वरी ॥ ४॥
तत्पदं पातु मे पादौ जंघे च सवितुः पदं ॥ वरेण्यं कटि देशं च ना
भिं भर्गस्तथैव च ॥ ५ ॥ देवस्य मे तु हृदयं धीमहीति गलं तथा ॥
धियो मे वदनं रक्षेद्यो मे रक्षतु नासिके ॥ ६ ॥ नः पदं मे ललाटे
स्या न्मूर्धानं मे प्रचोदयात् ॥ तद्वर्णः पातु मूर्धानं सकारः पातु भाल ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=05.08.19 14:47
,TRANSFERRED=2019/08/05 at 14:52:30
,PAGES=8
,TYPE=STD
,NAME=S0001308
,Book Name=M-139-GAYTRI SHAP VIMOCHAN GAYATRI PANCHANGAM
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection